(780) " तेपृ क्षरणार्थः " (I-भ्वादिः-363. अक. सेट्. आत्म.)

' कम्पने च ' इति क्षीरस्वाम्यादयः ।

तेपकः-पिका, तेपकः-पिका, तितेपिषकः-षिका, तेतेपकः-पिका ; इत्यादीनि सर्वाण्यपि रूपाणि केपृधातुवत् (261) ज्ञेयानि । तेपितम्[A] । [1]तेपनः । तृचि गणकार्यस्यानित्यत्वात् तेप्ता इति क्षीरस्वामी ।

(781) " तेवृ देवने " (I-भ्वादिः-499. अक. सेट्. आत्म.)

तेवकः-विका, तेवकः-विका, तितेविषकः-षिका, तेतेवकः-विका ; इत्यादीनि सर्वाणि रूपाणि केपतिवत् (261) बोध्यानि । क्विपि-[B]तयूः[2]-तय्वौ-तय्वः इति विशेषः ।

(782) " त्यज हानौ " (I-भ्वादिः-986. सक. अनि. पर.)

हानिः=उत्सर्गः इति बालमनोरमा । त्यागः इति क्षीरस्वामी ।

त्याजकः-जिका, त्याजकः-जिका, [3]तित्यक्षकः-क्षिका, [4]तात्यजकः-जिका ;
[5]त्यक्ता-त्री, त्याजिता-त्री, तित्यक्षिता-त्री, तात्यजिता-त्री ;
त्यजन्-न्ती, त्याजयन्-न्ती, तित्यक्षन्-न्ती ; —
त्यक्ष्यन्-न्ती-ती, त्याजयिष्यन्-न्ती-ती, तित्यक्षिष्यन्-न्ती-ती ; —
[6]व्यतित्यजमानः, त्याजयमानः, तित्यक्ष्यमाणः, तात्यज्यमानः ;
— त्याजयिष्यमाणः, तित्यक्षिष्यमाणः, तात्यजिष्यमाणः ;
[7]त्यक्-त्यग्-त्यजौ-त्यजः ; — —

---

1. ' अनुदात्तेतश्च हलादेः ' (3-2-149) इति ताच्छीलिको युच् ।
2. ' च्छ्वोः शूडनुनासिके च ' (6-4-19) इति ऊठि गुणे अयादेशे च रूपम् ।
3. सनि, झलि परतः ' चो कुः ' (8-2-30) इति कुत्वे, षत्वे च रूपम् । एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया ।
4. यङन्तेऽभ्यासस्य, ' दीर्घोऽकितः ' (7-4-83) इति दीर्घः । एवं सर्वत्र ज्ञेयम् ।
5. जकारस्य कुत्वेन चकारः । एवं तव्यदादिष्वपि ज्ञेयम् ।
6. ' कर्तरि कर्मव्यतीहारे ' (1-3-14) इति शानच् ।
7. क्विपि, कुत्वे, जश्त्वे च रूपम् ।

A. ' अतिप्त हर्षाश्रु धृतिश्च तेपिता गृहानिमान् प्रस्तिपितार्ति पश्यतः । ' धा. का. 1. 47.

B. ' कलोरुकल्लोलकलिन्दजाजले बालैस्तयूभिः सह देवनोत्सुकम् ॥ ' धा. का. 1.64.

Indologisches Seminar
der Universität Bonn